# श्री चंडी कवचं (सप्तशती पाटान्तर्गातम) - श्री देव्या स्तोत्रं

अस्य श्री चण्डी कवचस्य | ब्रह्मा ऋषि: | अनुष्टुप्छन्द: | चामुण्डा देवता |
अङ्गन्यासोक्त मातरो बीजम् | दिग्बन्ध देवतास्तत्त्वम् |
श्री जगदम्बा प्रीत्यर्थे सप्तशती पाठाङ्गत्वेन जपे विनियोग: ॥ नम श्चण्डिकायै ||

## मार्कण्डेय उवाच

यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् । यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह || १ ||

## ब्रह्मोवाच

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने || २ ||

प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ।
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् || ३ ||

पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च ।
सप्तमं कालरात्रीति महागौरीति चाष्टमम् || ४ ||

नवं सिद्धिदात्री च नवदुर्गा: प्रकीर्तिता: ।
उक्ता न्येतानि नामानि ब्रह्मणैव महात्मना || ५ ||

अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ।
विषमे दुर्गमे चैव भयार्ता: शरणं गता: || ६ ||

न तेषां जायते किंचिदशुभं रणसंकटे ।
नापदं तस्य पश्यामि शोकदु:खभयं न हि || ७ ||





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धि: प्रजायते ।
ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशय: || ८ ||

प्रेतसंस्था तु चामुण्डा वाराही महिषासना ।
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना || ९ ||

माहेश्वरी वृषारूढा कौमारी शिखिवाहना ।
लक्ष्मी: पद्मासना देवी पद्महस्ता हरिप्रिया || १० ||

श्वेतरूपधरा देवी ईश्वरी वृषवाहना ।
ब्राह्मी हंस समारूढा सर्वाभरण भूषिता || ११ ||

इत्येता मातर: सर्वा: सर्वयोगसमन्विता: ।
नानाभरण शोभाढया नानारत्नोपशोभिता: || १२ ||

दृश्यन्ते रथमारूढा देव्य: क्रोधसमाकुला: ।
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम् || १३ ||

खेटकं तोमरं चैव परशुं पाशमेव च ।
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् || १४ ||

दैत्यानां देहनाशाय भक्ताना मभयाय च ।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै || १५ ||

नमस्तेस्तु महारौद्रे महाघोरपराक्रमे ।
महाबले महोत्साहे महाभयविनाशिनि || १६ ||

त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि ।
प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता || १७ ||

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

दक्षिणेवतु वाराही नैर्ऋत्यां खड्गधारिणी ।
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी || १८ ||

उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी ।
ऊर्ध्व ब्रह्माणि मे रक्षेदधस्ताद् वैष्णवी तथा || १९ ||

एवं दश दिशो रक्षेच्चामुण्डा शववाहना ।
जया मे चाग्रत: पातु विजया पातु पृष्ठत: || २० ||

अजिता वामपार्श्वे तु दक्षिणे चापराजिता ।
शिखामुद्योतिनी रक्षेदुमा मूर्ध्नी व्यवस्थिता || २१ ||

मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी ।
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके || २२ ||

शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोद्र्वारवासिनी ।
कपोलौ कालिका रक्षेत्कर्णमूले तु शांकरी || २३ ||

नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ।
अधरे चामृतकला जिह्वायां च सरस्वती || २४ ||

दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका ।
घण्टिकां चित्रघण्टा च महामाया च तालुके || २५ ||

कामाक्षी चिबुकं रक्षेद् वाचं मे सर्वमङ्गला ।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी || २६ ||

नीलग्रीवा बहि:कण्ठे नलिकां नलकूबरी ।
स्कन्धयो: खड्गिनी रक्षेद् बाहू मे वज्रधारिणी || २७ ||



With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च ।
नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी || २८ ||

स्तनौ रक्षेन्महादेवी मन: शोकविनाशिनी ।
हृदये ललिता देवी उदरे शूलधारिणी || २९ ||

नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ।
पूतना कामिका मेढं गुदे महिषवाहिनी || ३० ||

कटयां भगवती रक्षेज्जानुनी विन्ध्यवासिनी ।
जङ्घे महाबला रक्षेत्सर्वकामप्रदायिनी || ३१ ||

गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी ।
पादाङ्गुलीषु श्री रक्षेत्पादाधस्तलवासिनी || ३२ ||

नखान् दंष्ट्राकराली च केशांश्चै वोर्ध्वकेशिनी ।
रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा || ३३ ||

रक्त मज्जावसामांसान्यस्थिमेदांसि पार्वती ।
अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी || ३४ ||

पद्मावती पद्मकोशे कफे चूडामणि स्तथा ।
ज्वालामुखी नखज्वालामभेद्या सर्वसंधिषु || ३५ ||

शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ।
अहंकारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी || ३६ ||

प्राणापानौ तथा व्यानमुदानं च समानकम् ।
वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना || ३७ ||



With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ।
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा || ३८ ||

आयू रक्षतु वाराही धर्म रक्षतु वैष्णवी ।
यश: कीर्ति च लक्ष्मीं च धनं विद्यां च चक्रिणी || ३९ ||

गोत्र मिन्द्राणि मे रक्षेत्पशून्मे रक्ष चण्डिके ।
पुत्रान् रक्षे न्महालक्ष्मी र्भार्या रक्षतु भैरवी || ४० ||

पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा ।
राजद्वारे महालक्ष्मीर्विजया सर्वत: स्थिता || ४१ ||

रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ।
तत्सर्व रक्ष मे देवि जयन्ती पापनाशिनी || ४२ ||

पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मन: ।
कवचेनावृतो नित्यं यत्र यत्रैव गच्छति || ४३ ||

तत्र तत्रार्थलाभश्च विजय: सार्वकामिक: ।
यं यं चिन्तयते कामं तं तं प्रापनेति निश्चितम् ||

परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् || ४४ ||
निर्भयो जायते मर्त्य: संग्रामेष्वपराजित: ।

त्रैलोक्ये तु भवेत्पूज्य: कवचेनावृत: पुमान् || ४५ ||
इदं तु देव्या: कवचं देवानामपि दुर्लभम् ।

य: पठेत्प्रयतो नित्यं त्रिसन्धयं श्रद्धयान्वित: || ४६ ||
दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजित: ।





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

जीवेद् वर्षशतं साग्रमपमृत्युविवर्जित: || ४७ ||
नश्यन्ति व्याधय: सर्वे लूताविस्फोटकादय: ।

स्थावरं जङ्गमं चैव कृत्रिमं चापि यद्विषम् || ४८ ||
अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले ।

भूचरा: खेचराश्चैव जलजाश्चोपदेशिका: || ४९ ||
सहजा कुलजा माला डाकिनी शकिनी तथा ।

अन्तरिक्षचरा घोरा डाकिन्यश्च महाबला: || ५० ||
ग्रहभूत पिशाचा श्च यक्षगन्धर्व राक्षसा: ।

ब्रह्मराक्षस वेताला: कूष्माण्डा भैरवादय: || ५१ ||
नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ।

मानोन्नति र्भवेद् राज्ञस्तेजो वृद्धिकरं परम् || ५२ ||
यशसा वर्धते सोऽपि कीर्ति मण्डित भूतले ।

जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा || ५३ ||
यावद्भूमण्डलं धत्ते सशैलवनकाननम् ।

ताव त्तिष्ठति मेदिन्यां संतति: पुत्रपौत्रिकी || ५४ ||
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ।

प्रापनेति पुरुषो नित्यं महामाया प्रसादत: || ५५ ||
लभते परमं रूपं शिवेन सह मोदते || ५६ ||

**इति श्री सप्तशती अंतर्गत श्री चंडी कवचं सम्पूर्ण**





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133